ऋग्वेद मण्डल १

अग्निम् ईळे पुरोहितं यज्ञस्य देवम् ऋत्विजम् ।
होतारं रत्नधातमम् ॥ १ ००१ ०१
अग्निः पूर्वेभिर् ऋषिभिर् ईड्यो नूतनैर् उत ।
स देवाꣳ एह वक्षति ॥ १ ००१ ०२
अग्निना रयिम् अश्नवत् पोषम् एव दिवे-दिवे ।
यशसं वीरवत्तमम् ॥ १ ००१ ०३
अग्ने यं यज्ञम् अध्वरं विश्वतः परिभूर् असि ।
स इद् देवेषु गच्छति ॥ १ ००१ ०४
अग्निर् होता कविक्रतुः सत्यश् चित्रश्रवस्तमः ।
देवो देवेभिर् आ गमत् ॥ १ ००१ ०५
यद् अङ्ग दाशुषे त्वम् अग्ने भद्रं करिष्यसि ।
तवेत् तत् सत्यम् अङ्गिरः ॥ १ ००१ ०६
उप त्वाग्ने दिवे-दिवे दोषावस्तर् धिया वयम् ।
नमो भरन्त एमसि ॥ १ ००१ ०७
राजन्तम् अध्वराणां गोपाम् ऋतस्य दीदिविम् ।
वर्धमानं स्वे दमे ॥ १ ००१ ०८
स नः पितेव सूनवे ऽग्ने सूपायनो भव ।
सचस्वा नः स्वस्तये ॥ १ ००१ ०९

वायव् आ याहि दर्शतेमे सोमा अरंकृताः ।
तेषाम् पाहि श्रुधी हवम् ॥ १ ००२ ०१
वाय उक्थेभिर् जरन्ते त्वाम् अच्छा जरितारः ।
सुतसोमा अहर्विदः ॥ १ ००२ ०२
वायो तव प्रपृञ्चती धेना जिगाति दाशुषे ।
उरूची सोमपीतये ॥ १ ००२ ०३
इन्द्रवायू इमे सुता उप प्रयोभिर् आ गतम् ।

इन्दवो वाम् उशन्ति हि ॥ १ ००२ ०४
वायव् इन्द्रश् च चेतथः सुतानाम् वाजिनीवसू ।
ताव् आ यातम् उप द्रवत् ॥ १ ००२ ०५
वायव् इन्द्रश् च सुन्वत आ यातम् उप निष्कृतम् ।
मक्ष्व् ऐत्था धिया नरा ॥ १ ००२ ०६
मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् ।
धियं घृताचीं साधन्ता ॥ १ ००२ ०७
ऋतेन मित्रावरुणाव् ऋतावृधाव् ऋतस्पृशा ।
क्रतुम् बृहन्तम् आशाथे ॥ १ ००२ ०८
कवी नो मित्रावरुणा तुविजाता उरुक्षया ।
दक्षम् दधाते अपसम् ॥ १ ००२ ०९